श्रीगणपतिर्जयाति॥ अस्यश्रीगणपतिकवचस्य॥ कश्यपऋषिः॥ गणपतिर्देवता॥
अनुष्टुप्छंदः॥ममममनोरथसिध्यर्थंश्रीमहागणपतिप्रीत्यर्थंजपेविनियोगः॥ध्यानं॥
ध्यायेत्सिंहगतंविनायकममुंदिग्बाहुमाद्येयुगेत्रेतायांतुमयूरवाहनममुंषड्बाहुकंसिद्धि
दं॥द्वापारेतुगजाननंयुगभुजंरक्तांगरागंविभुंतुर्ये तुद्विभुजंसितांगरुचिरंसर्वार्थदंस
र्वदा॥१॥विनायकःशिखांपातुपरमात्मापरात्परः॥अतिसुंदरकायस्तुमस्तकंतुमहोत्कटः॥२॥ल
लाटंकाश्यपःपातुभ्रुयुगंतुमहोदरः॥नयनेभालचंद्रस्तुगजास्यस्त्वोष्ठपल्लवौ॥३॥जिह्वांपातुगण
क्रीडश्चुबुकंगिरिजासुतः॥वाचंविनायकःपातुदंतान्रक्षतुदुर्मुखः॥४॥श्रवणौपाशपाणिस्तुनासि
कांचिंतितार्थदः॥गणेशस्तुमुखंकंठंपातुदेवोगणंजयः॥५॥स्कंधौपातुगजस्कंधःस्तनौविघ्नविनाश
नः॥हृदयंगणनाथस्तुहेरंबोजठरंमहान्॥६॥धराधरःपातुपार्श्वौपृष्ठंविघ्नहरःशुभः॥लिंगंगुह्यं
दापातुवक्रतुंडोमहाबलः॥७॥गणक्रीडोजानुजंघेपातुमेगणनायकः॥एकदंतोमहाबुद्धिःपादौगु
ल्फौसदावतु॥८॥भूमादस्त्वग्रतःपातुप्रमोदःपृष्ठतोवतु॥प्राच्यांरक्षतुबुद्धीशआग्नेय्यांसिद्धिदायकः
॥९॥दक्षिणस्यामुमापुत्रोनैर्ऋत्यांतुगणेश्वरः॥प्रतीच्योविघ्नहर्तात्यावायव्यांगजकर्णकः॥१०॥कौबेर्यां
निधिपःपायादीशान्यांमीशनंदनः॥दिवाव्याद्देकदंतस्तुरात्रौसंध्यास्तुविघ्नहृत्॥११॥राक्षसास्तु

ओं

१०क० वेतालग्रहभूतपिशाचतः॥पाशांकुशधरः पातु रजः सत्वेतमः स्मृतिः॥२१॥ ज्ञानंधर्मंचलक्ष्मींच
१ लज्जांकीर्तिंतथाकुलं॥वपुर्धनंचधान्यंचगृहदारान्सुतान्सखीन्॥२३॥सर्वायुधधरःपोत्रा
न्मयूरेशोवतात्सदा॥कपिलोजाविकंपातुगजाश्वंविकटोवतु॥२४॥भूर्जपत्रेलिखित्वेदंयःकंठे धा
रयेत्सुधीः॥नभयंजायतेतस्ययक्षरक्षःपिशाचतः॥२५॥त्रिसंध्यंजपतेनित्यंवज्रसारतनुर्भ
वेत्॥यात्राकालेपठेद्यस्तुनिर्विघ्नेनफलंलभेत्॥२६॥युद्धकालेपठेद्यस्तुविजयंप्राप्नुयाद्ध्रुवं॥मार
णोच्चाटनाकर्षस्तंभमोहनकर्मणि॥२७॥सप्तवारंजपेदेतद्दिनानामेकविंशतिं॥तत्तत्फलमवाप्नो
तिसाधकोनात्रसंशयः॥२८॥कारागृहगतंसद्योराज्ञावध्यंचमोचयेत्॥राजदर्शनवेलायांपठेदे
तत्त्रिवारतः॥२९॥सराजानंवशंनीत्वाप्रकृतीश्चसभाजयेत्॥इदंगणेशकवचंकश्यपेनसमीरितं॥३०॥मु
द्गलायचतेनाथमोड्यायमहर्षये॥मत्सरायप्राहकृपयाकवचंसर्वसिद्धिदं॥३१॥नदेयंभक्ति
हीनायदेयंश्रद्धावतेशुभं॥अनेनास्यकृतारक्षानबाधास्यभवेत्क्वचित्॥३२॥राक्षसासुर
वेतालदैत्यदानवसंभवा॥इतिश्रीगणेशपुराणेउ० बा० गणेशकवचंसंपूर्णं॥श्रीगजा
ननार्पणमस्तु॥शके१७४० बहुधान्यनामसंवत्सरे माघशुक्लदशम्यांगुरुवासरेस १
माप्तम्॥ १ ॥

ओं श्रीगणेशायनमः॥विश्वानरउवाच॥एकंब्रह्मैवाद्वितीयंसमस्तंसत्यंसत्यंनेहना
नास्तिकिंचित्॥एकोरुद्रोनद्वितीयोवतस्थेतस्मादेकंत्वांप्रपद्येमहेश॥१॥एकः
कर्तात्वंहिसर्वस्यशंभोनानारूपेष्वेकरूपोस्यरूपः॥यद्वत्सत्यंचार्कएकोप्यनेक
स्तस्मान्मायांतांविनेशंप्रपद्ये॥२॥रज्जोसर्पःशुक्तिकायांचरूप्यंनेरः
पूरःस्तन्नरगौरव्यमरीचौ॥यद्वत्तद्वद्विश्वगेषप्रपंचेयस्मिञ्जातेतंप्रपद्येमहे
श॥३॥तोयेशेत्यंदाहकत्वंचवह्नौतापोभानौशीतभानौप्रसादः॥पुष्पेगंधो
दुग्धमध्येचसर्पिर्यंतंछंभोत्वंततस्त्वांप्रपद्ये॥४॥शब्दंगृह्णास्यश्रवास्त्वं
हिजिघ्रेरघ्राणस्त्वंव्यघ्रिरायासिहस्तान्॥व्यक्षःपश्येस्त्वंरसज्ञोप्यजिह्वः कस्त्वां
सम्यक्वेत्यंतस्त्वांप्रपद्ये॥५॥नोवेदस्त्वामीशसाक्षाद्विवेदनोवाविष्णुर्नो

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

विधातारिलस्य॥नोयोगीद्रानेंद्रमुख्याश्चदेवाभक्तोवेदत्वामनस्तोप्रपद्ये ६
नोतेगोत्रंनापिजन्मापितारन्यानोवारूपोनेवशीलंनदेशः॥इत्थंभूतोपीश्वर
स्त्रिलोक्याःसर्वान्कामान्पूरयेस्तद्जेत्वं॥७॥त्वत्तःसर्वंत्वहिसर्वस्मरारेत्वंगो
रीशस्त्वंचनग्नोतिशांतः॥त्वंवैवृद्धस्त्वंयुवात्वंचबालस्त्वंक्रियत्वंभास्यत
स्त्वांनतोस्मि॥८॥स्तुत्वेतिभूमोनिपपातविप्रःसदंडवद्यावदतीवहृष्टः॥
तावत्सबालोखिलरुद्ररूपःप्रोवाचभूदेववरंवृणीहि॥९॥ततउत्थायहृ
ष्टात्मामुनिर्विभ्वानरःसती॥प्रत्यब्रवीत्किमज्ञातंसर्वज्ञस्यतवप्रभो॥ १
सर्वांतरात्माभवान्सर्वःसर्वःप्रदोभवान्॥यांच्यांप्रतिनियुक्तोमाकि
मीशोदैन्यकारिणिं॥११॥इतिश्रुत्वावचस्तस्यदेवोविभ्वानरस्यच॥शुचेःशुचि
व्रतस्याथशुचिःस्मित्वाब्रवीद्विभुः॥१२॥बालउवाच॥त्वयाशुचेःशुचि

१

भक्त्यांयोभिलाषःकृतोहृदि॥अचिरेणैवकालेनसभविष्यत्यसंशयः॥१३॥तवपुत्र
त्वमेष्यामिशुचिभक्त्यामहामते॥ख्यातोगृहपतिर्नाम्नाशुचिःसर्वामरप्रियः १४
अभिलाषाष्टकंपुण्यंस्तोत्रमेतत्प्रियंतव॥अद्यप्रभृतिकालेपठनात्कामदंशिवसन्नि
धौ॥१५॥एतत्स्तोत्रस्यपठनंपुत्रपौत्रधनप्रदं॥सर्वशांतिकरंवापिसर्वोपद्रवनि
शनं॥१६॥स्वर्गापवर्गसंपत्तिकारकंनात्रसंशयः॥प्रातरुत्थायसुस्नातोलिंग
मभ्यर्चशांभवं॥१७॥वर्षंजपन्निदंस्तोत्रमपुत्रःपुत्रवांभवेत्॥नेशास्वेकार्तिके
माघेविशेषनियमेर्युतः॥१८॥यःपठेत्स्नानसमयेलभतेसकलंफलं॥कार्तिक
स्यतुमासस्यप्रसादाद्दमव्ययः॥१९॥तवपुत्रत्वमेष्यामियस्त्वन्यस्तंठिष्यति॥
अभिलाषाष्टकमिदंनदेयंयस्यकस्यचित्॥२०॥गोपनीयंप्रयत्नेनमहावंध्याप्र
सूतिरत्र॥स्त्रियावापुरुषेणापिनियमाल्लिंगसन्निधौ॥२१॥अत्यंजन्नमिदंस्तो

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

त्रंपुत्रदानान्नसंशयः॥इत्युक्तोतर्द्धेवालःसोपिविप्रोगृहंगतः॥२२॥इतिश्रीस्कंदपु
राणेकाशीखंडेवीरेश्वरस्तोत्रंसंपूर्णं॥शके१७३७युवानामसंवत्सरेमाधव
यदशमीगुरुवारमूलनक्षत्रेशुभयोगेप्रहररात्रौसमाप्ता॥शुभंभवतु॥ ॥
जोगळेकरोपनामकपरशरामभटेनलिखापितं॥मोरेश्वरार्पणमस्तु॥ ॥
गोपालकृष्णार्पणमस्तु॥मृत्युंजयार्पणमस्तु॥महाकालिमहालक्ष्मीमहासर
स्वतीप्रीयेतां॥गणेशार्पणमस्तु॥यथेष्टफलदेलोकेमनोरथप्रपूरणं॥अष्टसि
द्धिमयंसाध्यंसाधकानांधनंजयं॥सृष्टिकर्तृजगद्धात्रीब्रह्मचारीगजाननः॥
सर्वसिद्धिप्रदायकोसर्वसंकष्टनाशनः॥परमेश्वरश्चदेवश्चभगवान्मयु
रेश्वरः॥हेरंबहेउत्तमभोगभोगतालक्ष्मीश्चविद्यायशपुत्रदेता॥लक्ष्मी॥